# कालिदासकाव्यनाटकेषु वैदिकभाषायाः प्रभावः

अदिति भट्टाचार्या

**सारसंक्षेपः**

वेदब्राह्मणारण्यकोपनिषदां परवर्तिनि काले ग्रथितानि रामायणमहाभारतादीनि महाकाव्यानि। महाकाव्ययुगादनन्तरम् संस्कृतसाहित्ये भासकालिदासप्रभृतीनां कवीनां नामानि अद्यापि सर्वैः साहित्यरसाग्राहिभिर्नरैः सश्रद्धया स्मर्यन्ते। अद्यापि तेषां कविप्रवराणां काव्यनाटकादीनि जनमानसे अहरहः नूतनया समुपस्थितानि सन्ति जनान् प्रभावयन्ति, उद्बोधयन्ति नूतनेषु कार्येषु, नूतनमार्गदर्शनेन च तेषामात्मीयत्वेन तन्मनसि एव वर्तन्ते। वेदानुवर्तिनि समाजेऽपि मनीषिणः वेदभाविता आसन्निति तत्कृतरचनाधिमेन स्पष्टः प्रतीयते। प्रभावः यथासीत् यज्ञादीनां धर्माणां तथैव भाषागतः प्रभावोऽप्यस्वीकर्तुं न शक्यते। कविष्वेतेषु कालिदासः सर्वाग्रगण्यः । कालिदासकाव्येषु तत्कृताभिनवरचनासौकर्येण वेदभावना तथा वेदसदृशी भाषा असकृद् दृक्पथमारोहति। प्रबन्धस्यास्य तदेवालोच्यः विषयः ।

**भूमिका :**

अतीन्द्रियज्ञानात्मको वेदः । अनादिरनन्तोऽयं ज्ञानात्मको वेदः फल्गुधारा इव वैदिकार्यानां तथा भारतीयानां मध्ये प्रवाहित आसीत् । सा एव ज्ञानगङ्गाधारा अनितरसाधारणकाव्यरूपतया प्रकाशपथं गता उत्तरकाले। वेदेनेष्टप्राप्तिर्भवति, अनिष्टपरिहारश्च सम्भवति तेनैव । प्रज्ञासमुज्ज्वलज्ञानाधिकारिणां ऋषीणां मतेन वेदस्य चतुष्प्रकारत्वं ऋक्सामयजुरथर्वभेदेन। एतेषामपि प्रत्येकेषां मन्त्रब्राह्मणभेदाद्विप्रकारत्वम्। आरण्यकमुपनिषदौ च ब्राह्मणस्यैव परिणामौ । अस्मिन्नेव ज्ञानरूपे वेदे अन्तर्भवति सर्वा विद्या। कर्मकाण्डमाश्रित्य विरचितः मन्त्रभागोऽस्ति, अस्ति तावत् मन्त्रभागस्य व्याख्यानानि ब्राह्मणादीनि। तथैव व वर्तन्ते ज्ञानकाण्डमाश्रित्य वर्तमाना उपनिषदादयः । तत्र सुविस्तरेऽस्मिन् वेदेऽन्तर्भवति विविधाः विषयाः। विषयाणां भावगाम्भीर्यं वैचित्र्यञ्च बेदोत्तरीयान् महाकवीनपि प्रभावयति। कालिदासस्तु नात्र व्यतिक्रमः ।

व्यासवाल्मीकयोरनन्तरमेव यस्य नाम समायाति सर्वेषामपि मनसि स एव महाकविः कालिदासः । महाकवेरस्य काव्यनाटकादीनि संस्कृतसाहित्यं मर्यादाया सर्वोत्तमे स्थाने समारोहितवन्ति। महाकवेरस्य जन्मसमयविषये अस्ति मतानैक्यम् । मतादीनालोच्य महाकविरयं ख्रीष्टियसप्तमशतकस्य प्राक्कालीन आसीत् इति मन्यते ।

महाकवेरस्य रचनायां प्रायश एव वैदिक प्रभाव दृक्पथमारोहति। महाकविरयं वेदभावनायां नितरां भावित आसीत् । वैदिकसाहित्ये तस्य प्रगाढं ज्ञानमासीत्। काव्यादिषु वैदिकयज्ञस्य वर्णनात् ब्राह्मण्यधर्मं प्रति अपि तस्य प्रगाढा श्रद्धा आसीत् इति स्फुटीभवति। तद्विरचितेषु काव्यनाटकेषु यथोपलभ्यते वैदिकशब्दप्रयोगास्तथैव तस्य साहित्ये अस्ति वैदिकः प्रभावः । ऋग्वेदस्य दशममण्डले अस्ति उर्वशीपुरूरवासंवादसूक्तम्। उर्वशीपुरूरवसोः वेदस्थिताख्यानमार्गेणोद्बुद्धः सन् असौ विक्रमोर्वशीयमिति नाटकं विरचितवान्। आलोच्यं तावदेतदेवास्ति कालिदासः कीदृशो वेदभावित आसीत्, कालिदासरचनासु वैदिकभाषाया प्रभाव आसीन्न वेति। वेदगतमाख्यानमनुसृत्य विरचिते कालिदासनाटके वैदिकप्रभाव कियान् वर्तते इत्यप्यनुसन्धेयम्।
प्रथमत आलोच्यते कालिदासकाव्ये वैदिकछन्दविषये।

**वैतालिकं छन्दः**

कालिदासीये पाठकजनमनोहरे सर्वोत्तमे ‘अभिज्ञानशकुन्तलमि’ति नाटके तावदुपलभ्यते वैदिकछन्दसा विरचितः श्लोकः। नाटकस्यास्य चतुर्थेऽङ्के महर्षिः कण्वः पतिगृहगमनशीलायै शकुन्तलायै ‘अमीं वेदिं परितः’- इति श्लोकेनाशीर्वादं प्रयच्छति। श्लोकात् प्राक् ‘ऋक्छन्दसा आशास्ते’ इति मञ्चनिर्देशो वर्तते। समग्रः श्लोकस्तत्रैवम्-

**‘अमीं वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।**
**अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु॥’[1]इति।**

त्रिष्टुप्छन्दसा[2] विरचितोऽयं श्लोकः केचिच्च वातोर्मीशालिन्योः[3] मिश्रणेनोपजातिछन्दसा ग्रथितोऽयं श्लोक इति मन्यन्ते। अत्र तु छन्दस्येतरस्यापि नियमो नानुसृतः। मञ्चनिर्देशे नानुसृते वैदिकछन्दसा ग्रथित इति कथयितुं शक्यते। मञ्चनिर्देशो त्वप्रयोजनीय इति केचिद्वदन्ति। अन्ये केचन मञ्चनिर्देशस्योद्देश्यं तावत् स्वरसंयोगेन ऋङ्मन्त्र इव पाठस्य पुनरावर्तनमिति मन्यन्ते। अतः श्लोकोऽयं वैदिकछन्दसा ग्रथितो न वेति विषये पण्डितानां मतवैभिन्न्यमस्ति।

**वेदगतसूक्तेन आख्यानसादृश्यम्-**

महाकविग्रथितं ‘विक्रमोर्वशीयमि’ति प्रसिद्धं नाटकं विद्यते। प्रतिष्ठानपुरराजः पुरूरवा स्वर्गस्य चानिन्द्यसुन्दरी अप्सरा उर्वशी नाटकस्यास्य प्रमुख्यं चरित्रद्वयम्। नाटकमिदं तु एतयोः प्रणयाख्यानमवलम्ब्य रचितम्। ऋग्वेदस्य दशममण्डलस्थितं पञ्चनवतितमं सूक्तं तावद्

उर्वशीपुरूरवसोः कथोपकथनात्मकं संवादसूक्तम्। पुरातनमिदमाख्यानं नाट्यकारेण लोकोत्तरप्रतिभया नवीकृतम्।

ऋग्वेदस्थिते उर्वशीपुरूरवसोः संवादसूक्ते(१०.९५) अष्टादशभिर्मन्त्रैराख्यानं चित्रितम्। तत्रास्ति तावत् – पुरूरवा इति कश्चिन्नृपः स्वर्गस्याप्सरसः उर्वश्याः प्रेम्ना आबद्धः सन् वर्षचतुष्टयं यावत्तया सहैकत्रातिवाहयामास। सन्तानसम्भवा उर्वशी कदाचिन्मर्त्यलोके स्थातुमनिच्छुका सती पुरूरवसः सनिर्बन्धमनुरोधमुपेक्ष्यान्तर्हिता बभूव। उन्मत्तप्रायः पुरूरवा प्रियान्वेषणार्थं वहिरागत्य कस्मिंश्चित् सरोवरे अप्सरोभिः परिवृता उर्वशी विहरतीत्यपश्यत्। पुरूरवसरनुनयस्योत्तरेणोर्वशी अवदत् – अहं प्रथमा उषा इव प्रत्यायाता। अतस्त्वया सह वाक्यालापेनालम् । त्वम् गृहं प्रत्यागच्छ इति। सर्वमिदं निशम्य प्रानत्यागे उद्यतं नृपं निवर्तयितुमुर्वशी कथयामास – आत्ममृत्युकामना न कर्तव्या, नात्मा विनष्टव्यः, वृकास्त्वां न भक्षयन्तु इति। स्त्रियां प्रणयस्तु न चिरं तिष्ठति। तासां हृदयं वृकहृदयवदेव।

**'न वै स्त्रैणानि सख्यानि सन्ति सालावृकाणां हृदयान्येता।'**[४]

उर्वश्या उक्तिद्वारेण तस्याः प्रेमशैथिल्यं निष्ठुरत्वं च प्रकाशपथमायाति। अपरतः प्रियाप्रत्याख्यातस्य पुरूरवसोऽस्यामुक्तौ तस्य प्रेम्नः गभीरता एव प्रकटिता। वस्तुतः उर्वश्याः गर्भे पुरूरवसः अपत्योत्पत्तेः परम् उर्वशी मर्त्यलोके न स्थास्यतीति शर्तमासीत्। सन्तानसम्भवा उर्वशी स्वर्गं प्रत्यागच्छत्। पुरूरवसः अपत्यं यथाकालं तत्समीपे यथाकालं तत्समीपे प्रेरयिष्यतीति प्रतिज्ञातं तया।

ऋग्वेदास्यापूर्वमिदमाख्यानमेव महाकविना स्वकीयकाव्ये अपूर्वतया चित्रितम्। पुरातनं वृत्तान्तमिमं प्रयोजनानुसारतः परिवर्तितं क्वचिच्च परिवर्धितं कृत्वा स्वकपोलकल्पितभावनां संयोजयन् स्वातन्त्रेणाभिनवत्वेन च परिवेशितम्। केशीति दानवेनापहृता ससखी उर्वशी राज्ञा पुरूरवसा रक्षिता इत्ययं वृत्तान्त उपलभ्यते तावत् प्रथमेऽङ्के। एष वृत्तान्तस्तु वेदस्थितसंवादसूक्ते नोपलभ्यते। नाटकस्य द्वितीयाङ्कस्थितमाख्यानं कविकल्पितम्। अङ्केऽस्मिन् स्वोद्भावितं वृत्तान्तमवतारयन् एकतो नाट्यगतिमव्याहतं कृतवान् अन्यतो दर्शकानां मनसि चासर्जयत् महतीं नाटकीयामुत्कण्ठाम्।

तृतीयाङ्कस्याख्यानं तावत् स्वर्गमर्त्याश्रयि। अत्रोपलभ्यते उर्वशीं प्रति भरतस्याभिशापवृत्तान्तम् उर्वश्याश्च मर्त्यागमनम्। अपि च वृत्तान्तोऽयं वेददुर्लभः । चतुर्थाङ्कस्य सम्पूर्णं नाट्यवृत्तं नाट्यकारस्य कालिदासस्य नवनवोन्मेषशालिन्याः प्रतिभायाः स्वाक्षरवाहि। कस्मिंश्चिदपि ग्रन्थे नावाप्यते वृत्तान्तोऽयम्। अङ्केऽस्मिन्नस्ति नायकनायिकयोः

सुदीर्घो विच्छेदः। प्रेमगाम्भीर्यं पवित्रताञ्च सम्पादनार्थं नाट्यकारः सम्पूर्णतया अत्र कल्पनामाश्रयामास।

पञ्चमाङ्के दृश्यते यत् प्रियविच्छेदाशंकया सुदीर्घकालं यावत् पुत्रस्यायोर्जन्मवृत्तान्तं सङ्गोपितवती। पश्चाद् घटनाक्रमात्तस्य पुत्रस्य परिचयः प्रकाशितः । राज्ञोऽतिप्रियसङ्गमणीयमणेर्वृत्तान्तोऽस्त्यस्मिन्नङ्के। मणेरस्य केनचिद् गृध्रेणापहरणं पुनस्तस्योद्धरणमित्यादिकं संघटनमेव वर्णितमत्र। अस्मिन्नेवाङ्के उर्वश्याः शापमुक्तिः कुमारस्यायोः यौवराज्याभिषेकः पुरूरवकर्तृकं देवेभ्यो दुष्टदमनार्थं सहायताप्रदानं यावज्जीवनमुर्वश्याः पत्नीरूपेण चावाप्तिः इत्यादीनि संघटनानि वर्णितानि।

एवमसौ महाकविः स्वकीयकल्पनाद्वारेण कविप्रतिभया च वियोगान्तं वृत्तान्तमिमं मेलनान्तकं कृतवान्। वेदस्थितस्य सूक्तस्य वृत्तामाश्रित्य लोकोत्तरप्रतिभाशाली असौ महाकविः परिवर्तनं परिवर्धनं च समाचरन् नूतनवर्णनसहयोगेन सर्वत्रैव साफल्यस्य स्वाक्षरं प्रदर्शितवान्।

केवलं कतिपयैर्मन्त्रैराबद्धं वैदिकं उर्वशीपुरूरवसोः संवादसूक्तमिदम्। तन्मात्रमवलम्ब्य रचितेऽस्मिन् नाटके महाकवेः स्वकपोलकल्पिता संघटना अस्त्येव । यद्यपि वेदवर्णितमाख्यानमेव कविना स्वीकृतं तदीयकाव्ये, तथापि वेदवर्णिताख्यानस्य मध्ये या रहस्योक्तिर्वर्तते, तत्तु कविना न गृहीतम्। केवलं सरलतया आपातदृष्ट्या यदेवाख्यानांशस्य तात्पर्यमस्मत्समीपे प्रतिभाति तदनुसृतं कविना। प्रागालोच्यं किं तावत् वैदिकाख्यानस्यान्तर्निहितं तात्पर्यम्।

यद्यपि कालिदासस्य नाटके उर्वशीशब्दस्य अप्सरा इति साधारणतया अर्थं कृतवान्, वेदे तस्यार्थस्तु किं भवतीति द्रष्टामः । निरुक्तग्रन्थे यास्केनोक्तम्- ‘उर्वश्यप्सरा उर्वभ्यश्नुत उरूभ्यामश्नुत उरुर्वा वशः अस्याः’।[५] उरुपूर्वकादश्धातोः निष्पण्णोऽयं शब्दः । शब्दस्यास्यार्थः अनेकतया दिशा भवितुमर्हति। उक्तं तावद्दुर्गाचार्येण –‘उरु महद् यशोऽभिव्याप्नोतीति’। स्कन्दस्वामिना प्रोक्तम् –‘सम्भोगकाले कामिनं वशीकरोति’।

यास्केन पुनः प्रोक्तम् –‘अप्सरा अप्सारिणी’।[६] जलप्रभवा अप्सरा । ‘अप्सो नामे’ति व्यापिनः। शुक्लयजुर्वेदे अप्स इत्यस्य व्यापिन इति अर्थः कृतः व्याप्तार्थकाद् आप्धातोः निष्पण्णः अप्सशब्दः । अतः व्यापकं यद्रूपं तदेव अप्सः। तत्समन्विता रूपवती वा भवति अप्सरा । अतः अप्सशब्दात् मत्वर्थीयेन ‘र’प्रत्ययेन निष्पण्णः अप्सराशब्दः अन्यविलक्षणरूपसम्पन्नायाः कन्याया बोधकः । उर्वशी आसीत् अपरूपरूपयुक्ता काचिदमर्त्या अप्सरा। महदानन्दस्वरूपिणीयम्। स्वर्गीयं तदानन्दम्। अतः योऽपि तदानन्दप्राप्तये प्रयतिष्यति आनन्दं तस्यैव भविष्यतीत्याशयः । पुरूरवसः तथा प्रयत्न आसीद् अतः पुरुरवा

मर्त्यवासी भूत्वापि तां लब्धवान् इति मन्ये। उर्वशीशब्दस्य प्राचोऽर्थः ऊषा, अन्यतः पुरूरवा इत्यर्थे सूर्य इत्यवबुध्यते। सूर्ये उदिते ऊषावसानं भवति। अतः सूक्ते एवंविधं वर्णनमवलोक्यते यत् पुरूरवा कियत्कालमप्सरसा उर्वश्या एकत्र उषितवान्। पश्चादुर्वशी तं परित्यज्य गच्छति। यतः उषसा सूर्यस्य मिलनमसम्भवमेव। सुर्ये उदिते उषा अन्तर्हिता भवति । वैदिकसूक्ते उर्वशी उषाशब्देन सम्बोधिता वर्तते।[७] कदापि च उषसा तस्याः तुलनापि प्रकाशपथमायाति। कालिदासनाटके यत्तु दुर्लभम्। कालिदासेन वेदगतदिशा एवंविधं व्याख्यानं न कृतवान् । तत्र उर्वशी स्वर्गवासिनी अप्सरा एव , न तु उषा।

यास्केन निरुक्तग्रन्थे उर्वशी माध्यमिकवाचोऽधिष्ठात्रिणी देवीति वर्णिता । अन्यतः पुरूरवा इति प्राणवायुः।[८] अस्यैव सूक्तस्य एकस्मिन्मन्त्रेऽस्ति-

**'समस्मिञ्जायमान आसत उतेमवर्धन्नद्यः स्वगूर्ताः।**
**महे यत्त्वा पुरूरवो रणायावर्धयन् दस्युहत्याय देवाः॥'[९]**

देवास्तु कर्मजन्मानः । प्राणवायुः पुरूरवा वा वर्षासु वृष्टिप्रदानार्थमात्मानं प्रकाशयति, तत्क्षणादेव ग्लाः जलराशयो वा तद्विधेयतामुपगम्य तिष्ठन्ति। यद्यपि 'ग्ला'शब्दस्यार्थः जलमिति। तथापि निघण्टौ ग्लाशब्दः वागर्थे[१०] पठितः। उर्वशी माध्यमिकवाचः अधिष्ठात्रिणीति प्रागेवोल्लिखिता। अतः प्राणवायुना पुरूरवसा वाचः उर्वश्या वा सम्मेलनमत्र मन्त्रोक्तदिशा स्वाभाविकमेव।

एवमवेक्ष्यते उर्वशीपुरूरवसोः आख्यानांशः वेदे न तु साधारणतया वर्णितः। रहस्योक्तिद्वारेण अपूर्वभावप्रकाशमार्गेणैव वर्णितमिदमाख्यानमृषिणा। कालिदासनाटके तु वैदिकस्याख्यानस्याभिधार्थ एव गृहीतः, न तु तात्पर्यार्थः। तदेव वाच्यार्थः कालिदासेन स्वकीयोपलब्धिमार्गेण अपरूपवर्णनसहयोगेन सहृदयहृदयग्राहितया प्रकाशितः । वेदस्थितम् ऋषिमुखनिःसृतम् मन्त्रकतिपयोपेतम् आख्यानमेव अपूर्वजनमनोग्राहि सञ्जातम् ।

**भाषायां वैदिकः प्रभावः** –

महाकवेः कालिदासस्य रचनादिष्वनेकत्रैव विद्यते वैदिकभाषायाः प्रभावः । उदाहरणरूपेणोल्लिख्यन्ते कानिचित्।

प्रथमत उल्लेख्यस्तस्य 'रघुवंशमि'ति काव्ये 'त्रियम्बकम्'[११] इति शब्दस्य प्रयोगः । लौकिकः प्रयोगस्तु 'त्र्यम्बकमि'त्येव भवति। कालिदासः स्वयमेव 'रघुवंशमि'ति काव्ये शब्दस्य प्रयोगं कृतवान्।[१२] लौकिके कालिदासकाव्ये अस्ति तावद् वैदिकः प्रयोगः। पदमिदं तस्य गोचरे आसीदित्यवगन्तुं शक्यते एतेन। एष एव वैदिकः प्रभावस्तस्य भाषायाम् । अस्ति चात्र वेदविषयकं वार्तिकम्-'इयङुवङप्रकरणे तन्वादीनां छब्दसि बहुलमुपसंख्यानं कर्तव्यम्'[१३]।

'तं पातया प्रथममास पपात पश्चाद्' इत्यत्र 'प्रभ्रंशयां यो नहुषं चकार' इत्यत्र च लिङर्थे प्रयोगो वैदिकभाषामनुसृत्यैव कृतः। ब्रह्मणग्रन्थेष्वीदृशस्य रूपस्यासकृत् प्रयोगो दृश्यते।( द्र.VGA-MAC-Article 139) एतद्व्यतिरिक्तमपि 'रघुवंशमि'ति काव्ये 'प्रीतस्तुषाडिव शार्ङ्गिणम्','संयोजयां विधिवदास समेतबन्धुः','पश्चादध्यनार्थस्य धातोधिरिवाभवत्'-इत्यादिष्वपि वैदिकी रीतिरभिलक्ष्यते। एतादिषु व्यवहितः प्रयोगः सञ्जातः।

'कुमारसम्भवमि'ति महाकाव्येऽपि तावदुपलभ्यन्ते एतादृशाः प्रयोगाः येषां लौकिकव्याकरणदृष्ट्या व्याख्यानं न तु सर्वदैव भवितुमर्हति।

'गिरिमुपचचार प्रत्यहं सा सुकेशी' इत्यत्र 'अधिकरणे शेते'[१४] इति सूत्रान्तर्गतेन 'गिरेर्डश्छन्दसि' इति वार्तिकेन गिरिशब्दादुत्तरं शीधातोर्डप्रत्ययेन सिद्धः गिरीश इति शब्दः। वेदे एव शब्दोऽयं प्रायेन प्रयुज्यते। अत्र तु गिरिरस्यास्तीति विग्रहे 'लोमादित्वाच्छः' इति सूत्रेण छप्रत्ययेन शब्दोऽयं सिद्ध इति केचिद्वदन्ति।

एवमवेक्ष्यते यत् कालिदासेन सर्वत्र पाणिनिकृतानि सूत्राणि नानुसृतानि। अनेकत्रैव वैदिकव्याकरणनिष्पण्णानां शब्दानां प्रयोगः कृतः। वेदभावनया भावित आसीदसौ महाकविः। अतः भाषायामपि वेदस्य प्रभावः केषुचित् स्थलेषु समजनि।

कालिदासीये 'विक्रमोर्वशीयमि'ति नाटके नान्दीश्लोके रोदसीति शब्दः उपलभ्यते। वैदिक एवायं शब्दः । वेदे शब्दस्यास्य भूयः प्रयोगः दृश्यते। निघण्टुग्रन्थेऽपि द्यावापृथिव्योर्नामसु पदमिदं पठितम्। अतः कालिदासकाव्ये अस्य प्रयोगोऽपि वैदिकतामेव प्रदर्शयति।

**उपसंहारः**

विक्रमोर्वशीयमिति कालिदासरचितं महाकाव्यमतीव सुखपाठ्यम् । तत्र महाकविना स्वकपोलकल्पितकल्पनया बहुविषयः उपन्यस्तः । अतः अतीव सुखपाठ्यमिदम् । वेदपरवर्तिनि भारतीये समाजे वेदभावनया भावित आसीत् कविनाट्यकारादयः। अतस्तस्मिन् समये तेषां रचनादिषु वेदगतः प्रभाव अनेकत्र एव दृश्यते । क्वचिद् यज्ञगतः प्रभावः दृश्यते। क्वचिच्च वेदगतरहस्याच्छादितमाख्यानं सरलतया साधारणजनवोध्यसुखकरया भाषया अपूर्वं चित्रितं कविनाट्यकारादिभिः। समाजे तस्मिन् समयेऽपि बहुलतया वैदिकः प्रभाव आसीत् । आख्यानांशेषु भाषायां वैदिकः प्रभावः तस्यैवोदाहरणम् ।

**वैदिकः**
युगः गतप्रायः। परिवर्तिते समाजे पौराणिकः प्रभाव एव अधिकतया भाति। तथापि कालिदासादीनां कविनाट्यकृतां मनः वेदिकपरम्परानुगमिति दरीदृश्यन्ते तद्विरचितेषु रचनादिषु। न केवलं कालिदासः अन्येषामपि तत्कालीनानां कवीनां चेतसि वेदं प्रति श्रद्धा बहुलतया आसीत्। समाजे वेदभावना नावलुप्ता तदापि। सुविपुलं रहस्याच्छादितम् आर्यसाहित्यं प्रति शद्धावनतास्ते आसन्। अतः एतन्नातीवाश्चर्यकरं यत्तेषां रचनादिषु वेदगतप्रभावः असकृदस्ति।

**तथ्यसूचीः**

१. अभिज्ञानशकुन्तलम्, ४.८
२. '...गुर्ववेतरयोर् ऋक्षु तद्वृत्तं छन्दसा प्राहुः'.ऋ.प्रा.१७.३९
'इतरयोर्दशैकादशाक्षरयो उपोत्तमं गुरुर्भवति छन्दसामक्ष तद्वृत्तम्..'- उ.भा.(तत्रत्यम्)
३. 'शालिनी म् तौ त् गौ ग् समुद्रऋषयः'
'वातोर्म्मी म्तौ त्गौ ग्'- पि.सू.
४. न वै स्त्रैणानि सख्यानि...ऋग्वेद..१०.९५.१५
५. निरुक्तम्, ५.१३
६. तदेव
७. ऋग्वेद.१०.९५.२,४
८. नि.१०.४६ विज्ञायते हि 'वायुः प्राण एव पुरूरवा'(स्क.स्वा.)
९. ऋग्वेद.१०.९५.७
१०. निघण्टु.१.११
११. आसीनआसन्नशरीरपातकस्त्रियम्बकं संयमिनं ददर्श.'...कुमारसम्भवम्, ३.४४
१२. 'जडीकृतस्त्र्यम्बकवीक्षणेन..' रघुवंशम्, २.४१
१३. पाणिनिकृते अष्टाध्याय्याम् ६.४.७७ –(वार्तिकम्)
१४. पाणिनिकृते अष्टाधाय्याम् ३.२.१५

**ग्रन्थसूची**

1. *Nirukta of Yāskācārya*, Ed. Amareswar Thakur, University of Calcutta, Reprint 2005.

2. *Ṛgveda Saṁhitā with Sāyaṇa's Commentary*, Ed. Vaidik Samshodhan Mandala, Poona,1983.
3. *The Abhijñāna-Śakuntalam (of Kālidāsa)*- Ed. R.D.Karmakar,Poona,1952 ( 1st ed.).
4. ……………………,Ed. M.R.Kale, Motilal Banarasidass,Delhi 1969 (10th ed.).
5. *The Raghuvaṁśam of Kālidāsa,* With comm.. of Mallinatha, Ed. Gopal Raghunath Nandarkar, Motilal Banarasidas, Delhi, 1982.
6. *The Vikramorvasiyam of Kalidasa*, Ed. M.R.Kale (A new Sanskrit Commentary and Arthaprakashika), MLBD, Delhi, 1967(11th ed.), Reprint,1991.
7. *Vikramorvaśīyam of Kālidāsa,* Ed.C.R. Devadhar, Motilal Banarasidas, Delhi, 1966(3rd ed).
8. *उग्वेदप्रातिशाख्यम्*, अमरकुमार चट्टोपाध्याय (सम्पा), कलिकाता, २००७.
9. *कुमारसम्भवम् (कालिदासविरचितम्)*, श्रीगुरुनाथविद्यानिधिभट्टाचार्येण सम्पादितम्, कलिकाता, १९७०.
10. *पिङ्गलच्छन्दःसूत्रम्*, सीतानाथसामाध्यायी (सम्पा), कलिकाता, २००१(9th ed)